# दिल्ली पब्लिक स्कूल
## बोकारो इस्पात नगरम्

**कक्षा – नवमी** **संस्कृत नियत–कार्य (संख्या–3) 2009–2010**

1. (क) अधोलिखितं गद्यांशं पठित्वा एतदाधारित–प्रश्नानाम् उत्तराणि प्रदत्तस्थानेषु लिखन्तु –

तं हसन्तं विलोक्य सर्वे सभास्थिताः विद्वांसः स्तब्धाः जाताः। राज्ञा हास्यकारणं पृष्टम्। अष्टावक्रः अवदत् – '' राजन्, मया श्रुतमासीत् यद् भवतः राजसभा आत्मतत्त्वज्ञैः शास्त्ररहस्यवेदिभिः विद्वद्भिः अलङ्कृतः अस्ति, किन्तु सभां प्रविश्य पश्यामि, यदेते पण्डिताः मम वक्रदेहं दृष्ट्वा हसन्ति, अहमपि मिथ्याज्ञानगर्वितान् एतान् दृष्ट्वा हसामि।''

I एकपदेन उत्तरन्तु –

(i) हास्यकारणं केन पृष्टम्? (ii) तं हसन्तं दृष्ट्वा के स्तब्धाः जाताः?

II पूर्णवाक्येन उत्तरन्तु – राजसभां प्रविश्य अष्टावक्रः किं पश्यति?

2. प्रदत्त–संवादौपठित्वा प्रश्नोत्तराणि लिखन्तु –

(क) जनकः – स्वकीयं मनः समर्पयामि।

अष्टावक्रः – अस्तु, इदम् एव अस्तु। दीयतां मे स्वमनः।

जनकः – भगवन्! दत्तं मया स्वमनः भवते। सम्प्रति आदिशतु मां राजकार्याय।

अष्टावक्रः – कथं भवान् करिष्यति राजकार्यम्? भवतः मनः तु मम अधीनम्। मनसा शून्यः भवान् संकल्पविकल्पौ कर्तुं न अर्हति।

जनकः – (आत्मगतम्) कीदृशीं दशां प्राप्तोऽहम्। शान्ते मनसि अपूर्वा आनन्दानुभूतिः। परं कथं लौकिकं व्यवहारं करोमि –

I एकपदेन उत्तरन्तु –

(i) अष्टावक्रः जनकस्य किं वस्तु स्वीकरोति? (ii) राज्ञः मनः कस्य अधीनम् आसीत्?

II पूर्णवाक्येन उत्तरन्तु –

(i) स्वमनः दत्त्वा जनकः अष्टावक्रं किं कथयति? (ii) 'कीदृशीं दशां प्राप्तोऽहम्' इति कः कथं कथयति?

III (i) 'स्वकीयं मनः' अत्र विशेषणपदं किम् अस्ति? (ii) शान्ते मनसि अनयोः विशेषणपदं किमस्ति?

(ख) लक्ष्मीधरः – राजन्! यत्र जलपूर्णं सरः भवति, तत्र पक्षिणः स्वयं समायान्ति। अहमपि भवतां विद्यानुरागं दानशीलतां च समाकर्ण्य समागतोऽस्मि। भवद्राज्ये निवस्तुम् इच्छामि।

भोजः – ममैतत् सौभाग्यं यद् भवादृशाः विद्वांसः मम पण्डितपरिषदं विभूषयेयुः। (मन्त्रिणं प्रति) मन्त्रिवर! नगरपालं समाहूय आदिश्यतां यत् स लक्ष्मीधरविदुषे निवासव्यवस्थां कारयतु। नगरे कृतनिवासम् अपठितं जनं निःसार्य तद्गृहे एष पण्डितवरः वासयितव्यः।

मन्त्रीः – यथा आज्ञापयति देवः। (निष्क्रम्य पुनः नगरपालेन सह प्रविश्य)।

I एकपदेन उत्तरन्तु –

(i) जलपूर्णे सरसि के स्वयम् आगच्छन्ति? (ii) लक्ष्मीधरः कुत्र निवस्तुम् इच्छति?

II पूर्णवाक्येन उत्तरन्तु –

(i) भोजः किम् आत्मनः सौभाग्यं मन्यते? (ii) कं निःसार्य लक्ष्मीधरः वासयितव्यः।

III (i) 'समाहूय' इति पदे कः प्रत्ययः?

(ii) ''अपठितं जनं निःसार्य तद् गृहे एषः पण्डित वरः वासितव्यः'' इति कः कं कथयति।

3. अधोलिखितानि वाक्यानि घटना क्रमानुसारं पुनः लिखन्तु –

(i) (क) लक्ष्मणः रामस्य भरतस्य च रूपसादृश्येन भ्रान्तः भवति।
(ख) भरतस्य स्वागतार्थं रामेण आदिष्टा सीता गच्छति।
(ग) अन्ते भरतः रामस्य पादुके स्वीकरोति।
(घ) रामः सीता लक्ष्मणश्च आश्रमपदे स्थिताः।
(ङ) भरतः वने रामस्य पादमूले स्थातुम् इच्छति।
(च) लक्ष्मणः भरतस्य आगमनं रामाय निवेदयति।
(छ) भरतः समयं कथयति यत् चतुर्दशवर्षान्ते सः रामाय राज्यं प्रतिनिवर्तयिष्यति।
(ज) भरतः रथेन आश्रमपदं प्रविशति।

(ii) (क) तन्तुवायः तन्तुवयनेन जीविकाम् अर्जयति स्म।
(ख) वस्तुतः तन्तुवायः अपि कविः आसीत्।
(ग) राजाभोजः मन्त्रिणं लक्ष्मीधरस्य आवासव्यवस्थायै आदिशति।
(घ) एकदा लक्ष्मीधरः भोजराजस्य सभां गच्छति।
(ङ) भोजराजः लक्ष्मीधरस्य वाक्चातुर्येण प्रसन्नः भवति।
(च) नगरपालः नगरे कमपि निरक्षरं मूर्खं वा न अपश्यत्।
(छ) भोजराजः नगरपालं काव्यप्रतिभाहीनं जनं नगरात् लक्ष्मीधरं वासयितुम् आदिशति।
(ज) नगरपालः तन्तुवायं राजसभां नयति।

4. श्लोकं पठित्वा उत्तराणि लिखन्तु –

काव्यं करोमि नहि चारुतरंकरोमि
यत्नात् करोमि यदि चारुतरं करोमि।
भूपालमौलिमणिमण्डितपादपीठ
हे साहसाङ्क ! कवयामि वयामि यामि।।

I एकपदेन उत्तरन्तु –
(i) तन्तुवायः यत्नात् कीदृशं काव्यं करोति स्म ?
(ii) ''साहसाङ्क'' ! इति सम्बोधनं कस्मैप्रयुक्तम् ?

II पूर्णवाक्येन उत्तरन्तु –
तन्तुवायः यत्नात् विना अपि काव्यं कर्तुं समर्थः आसीत् न वा ?

III निर्देशानुसारम् उत्तरन्तु –
(i) ''यत्नात्'' इति पदे कः विभक्तिः ?
(ii) 'नृपः' इति पदस्य पर्यायः अत्र कः अस्ति।
(iii) ''यामि'' इति पदे कः धातुः ?
(iv) ''वयामि'' इति पदे कः लकारः।

5. प्रदत्त पदानां सहायतया 5 वाक्यात्मकम् अनुच्छेदं लिखन्तु –

(क) क्षेत्रस्य, कृषकाः, बीजानि, वपन्ति, महिलाः, गृहाणि, वृक्षाः, शुद्धम्, वातावरणम्, भवति।
(ख) राजपथस्य, शकटिका, वाहनानि, द्विचक्रिका, दुर्घटनाग्रस्तम्, वर्तते, धावन्ति, वृक्षाः।
(ग) वर्षायाः, बालकः, क्रीडति, बालिका, छत्रम्, मेघाः, वर्षन्ति, प्रसन्नाः, भवन्ति।

6. अधोलिखितम् अनुच्छेदौ पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरन्तु –

(क) जन्तुशालायां बहवः पशवः भवन्ति। अत्र विदेशेभ्यः अपि आनीय दुर्लभाः जन्तवः संगृह्यन्ते। जन्तुशालायाः विविधाः खण्डाः भवन्ति, क्वचित् वन्याः पशवः, क्वचित् सामान्याः जन्तवः, क्वचिच्च विविधदेशीयाः पशवः भवन्ति। विविधप्रदेशानां जन्तुशालाः अस्माभिः ज्ञानवर्धनाय, विनोदाय च दर्शनीयाः। जन्तुशालायाः शोभा वर्णनातीता भवति। जन्तूनां विविधाः क्रीडाः दृष्ट्वा सर्वेषां मनांसि आनन्देन पूरितानि भवन्ति।

I एकपदेन उत्तरन्तु –

(i) जन्तुशालायाः शोभा कीदृशी वर्तते ? (ii) जन्तुशालायां कुतः दुर्लभाः जन्तवः आनीयन्ते ?

II पूर्णवाक्येन उत्तरन्तु – जन्तुशालायाः विविधखण्डान् वर्णयन्तु।

III निर्देशानुसारम् उत्तरन्तु –

(i) ''मनांसि'' इति पदे का विभक्तिः प्रयुक्ता ? (ii) ''आनीय'' इति पदे कः प्रत्ययः प्रयुक्तः ?

(ख) एकः अति–अल्प–शिक्षितः ब्रह्मदेवः इति नाम नरः आसीत्। सः प्रतिदिनं स्नानात् परं शुद्ध–चेतसा प्रभुं स्मरति, गीतापाठं च करोति। यद्यपि तस्य उच्चारणम् अशुद्धम् आसीत्, तथापि सः तेन आनन्दमग्नः भवति। एकदा कश्चित् प्रख्यातभक्तः बुद्धिदेवः तं ब्रह्मदेवम् अपृच्छत्–'तव प्रभोः स्मरणे आनन्दप्राप्तेः कः हेतुः ? ब्रह्मदेवः प्रत्यवदत्–अहं गुरोः वचनानुसारं नित्यं पाठं करोमि, तदा मम समक्षं श्रीकृष्णः अर्जुनस्य रथे स्थित्वा गीतायाः उपदेशं करोति इति अहम् अनुभवामि। तेन मे मनसि अपूर्वः आनन्दः जायते। तच्छ्रुत्वा बुद्धिदेवः प्रसन्नमनाः तम् आलिङ्ग्य अवदत्–यस्य हृदयं शुद्धं, सः निरक्षरः अपि प्रभोः समीपेऽस्ति।

I एकपदेन उत्तरन्तु –

(i) ब्रह्मदेवस्य उच्चारणं कीदृशम् आसीत् ? (ii) अति अल्प शिक्षितस्य किं नाम ?

(iii) कस्य वचनानुसारं ब्रह्मदेवः गीता पाठम् अकरोत् ? (iv) बुद्धिदेवः कीदृशः आसीत् ?

II पूर्णवाक्येन उत्तरन्तु –

(i) बुद्धिदेवः ब्रह्मदेवं किम् अपृच्छत् ? (ii) पाठसमये बुद्धदेवः किम् अनुभवति स्म ?

III निर्देशानुसारम् उत्तरन्तु –

(i) 'शुद्धम्' इति पदे कः प्रत्ययः ? (ii) 'आलिङ्ग्य' इति पदे कः प्रत्ययः ?

(iii) प्रभोः इति पदे का विभक्तिः वर्तते ? (iv) बुद्धिदेवः प्रसन्नमनाः अनयोः विशेषणपदं लिखत।

7. प्रदत्तपदैः निम्नलिखित संवादौ पूरयित्वा पुनः लिखन्तु –

(क) वाल्मीकिः – मुने ! संसारे भवान् सर्वत्र .............................।

नारदः – महर्षे ! मन्ये, भवान् ............................... प्रष्टुम् इच्छति।

वाल्मीकिः – आम् ! किं भवान् तं ........................... जानाति यस्मिन् सर्वे गुणाः सम्भूय तिष्ठति ?

नारदः – महर्षे ! असौ महापुरुषः मर्यादा पुरुषोत्तमः दशरथनन्दनः श्रीरामचन्द्रः अस्ति।

**मञ्जूषा**

| |
|---|
| किमपि, पुरुषं, ज्ञातुम्, भ्रमति, दृढव्रतः |

(ख) सुलेखा – मातः, भवती आपणं गन्तुं .............................. आरोहतु।

माता – सुलेखे, आपणात् किं ..................................?

सुलेखा – सायंकाले अतिथयः ................................, तेषां कृते किमपि भवतु।

माता – मिष्टानम्। ................................ किम् ?

सुलेखा – शिशूनां कृते .............................. अपि क्रेतव्यानि ।

माता – सुष्ठु तावत् । अहम् आरोहामि ।

**मञ्जूषा**

| क्रीडनकानि, आगच्छन्ति, क्रेतव्यम्, अन्यत्, कारयानम् |
|---|

8. प्रदत्त पदानां सहायतया आचरण (सद्‌वृत्त) प्रमाणपत्रार्थं प्रधानाचार्यं प्रति लिखित–पत्रस्य रिक्तस्थानानि पूरयित्वा पुनः लिखन्तु –

सेवायाम्

प्राचार्यः

.................. महानुभाव !

सादरं नमोनमः

सेवायाम् इदं ...................... यत् अस्मिन् एव वर्षे .................... विद्यालयात् मैट्रिक .................... द्वितीयश्रेण्याम् उत्तीर्णा । .............................. विद्यालयस्य दशम्याः .............................. क्रमाङ्कः त्रिंशत् इति अभवत् । .............................. पादकन्दुकक्रीडायां सदा प्रमुखो ....................... गृहीतः । मम आचरणं विशुद्धं लोकप्रियञ्च आसीत् । कृपया .................. मम सद्‌वृत्तप्रमाणपत्रं मम सङ्केतेन प्रेषणीयम् ।

सबहुमानम्

.............................. प्रियशिष्यः

क ख ग

**मञ्जूषा**

| यथाशीघ्रं, मया, भवतां, मान्यः, परीक्षा, भागः, भवदीयः, निवेदनं, मम, कक्षायाः |
|---|

9. वर्णानां समुचितम् उच्चारण स्थानम् कोष्ठकात् चित्वा लिखन्तु –

| | | | |
|---|---|---|---|
| ल् | (कण्ठः / दन्ताः) | द् | (दन्ताः / तालुः) |
| न | (दन्तोष्ठम् / दन्ताः) | ह | (मूर्धा / कण्ठः) |
| व | (ओष्ठौ / दन्तोष्ठम्) | क | (कण्ठ / तालुः) |
| इ | (मूर्धा / तालुः) | ऋ | (तालुः / मूर्धा) |

10. वर्णसंयोजनं कृत्वा पद निर्माणकुरुत –

प् + र् + अ + थ् + आ

क् + अ + र् + त् + आ

अ + न् + उ + च् + छ् + ए + द् + अ + म्

11. प्रदत्त पदानां वर्णविन्यासं कुरुत –

कस्मात्, पञ्चमी, अध्यापकः, अन्ततोगत्वा, पितृणाम्, प्रसन्नता ।

12. रेखांकित पदेषु संधि विच्छेदं वा यथापेच्छितं कुरुत –

(क) <u>तदाकर्ण्य</u> ते चिन्तिताः अभवन् । (ख) धर्मः <u>सदैव</u> रक्षति ।

(ग) <u>शयनम्</u> अत्यावश्यकमस्ति । (घ) प्रियमित्र <u>नमस्ते</u> ।

(ङ) <u>वाक्+ईशः</u> प्रतिदिनं विद्यालये गच्छति । (च) प्रातः षष्ठवादने <u>सूर्य+उदयः</u> भवति ।

13. प्रकृति प्रत्यय संयोजनं वियोजनं वा यथापेक्षितं कुर्वन्तु –

(क) आलस्यं <u>विहाय</u> उद्यमम् कुरु।

(ख) अहम् <u>भ्रमन्</u> परिश्रान्तः।

(ग) अधुना वृष्टिः <u>आरब्धाः</u>।

(घ) सर्वे जनाः गृह <u>गताः</u>।

(ङ) सः चलचित्रं <u>पश्यन्</u> प्रसीदति।

(च) ते पुष्पम् <u>सम् + आ + घ्रा + ल्यप्</u> प्रसन्नाः सन्ति।

(छ) अस्माकं जीवनं राष्ट्रसेवायाम् <u>समर्पितम्</u>।

(ज) अत्र सर्वे भीताः सन्ति।

14. निर्देशानुसार यथोचितं धातु रूपैः रिक्तस्थानानि पूरयन्तु –

(क) अहं अद्य नाटकम् ——————————— (दृश्–लङ)

(ख) तन्तुवायः कवितां ——————————— (कृ–लट्)

(ग) श्रीकृष्णः गीतायाः उपदेशम् ——————— (दा–लङ्)

(घ) सा फलानि ———————————— (भक्ष्–लोट्)

(ङ) पिता पुत्राय पुस्तकानि ————————— (दा–लृट)

(च) वयं बोकारो इस्पात नगरे ———————— (वस्–विधिलिङ्)

(छ) सैनिका देशं ————————————— (रक्ष्–लृट्)

(ज) सदा मनसा ——————————— (पठ्–विधिलिङ्)

15. कोष्ठकेभ्यः शुद्धम् रूपं प्रयुज्य रिक्तस्थानानि पूरयन्तु –

(क) ————— प्रतिकूलानि परेषां न समाचरेत्। (आतम्नः / आत्मनः)

(ख) मानंहि ——————— धनम्। (महतां / महान्ताम्)

(ग) ——————— देव्यः गच्छन्ति। (त्रीणि / तिस्रः)

(घ) ——————— मम पुर्या अस्ति। (एषः / एषा)

(ङ) त्वं —————— उपहारं प्राप्तवान्। (कस्मात् / कस्य)

(च) अयं ——————— मित्रम् अस्ति। (मम / माम्)

(छ) आत्मा ——————— अस्ति। (अमरः / अमरा)

(ज) एतानि दिव्यानि —————— सन्ति। (आभूषणम् / आभूषणानि)

(झ) ———————— मिष्ठानं रोचते। (तस्मै / तम्)

(ञ) ———————— कः बलिष्ठः। (युष्मेषु / युष्मासु)

16. यथोचितं शब्दरुपैः रिक्तस्थानानि पूरयन्तु –

(क) सा प्रत्येकं ————————— विश्वसिति। (साधु)

(ख) अध्यक्षः ———————— पुरस्कारं दत्तवान्। (छात्र)

(ग) ——————— अंकुरः उत्पन्नः भवति। (पादप)

(घ) सः ——————— सह भ्रमणं करिष्यति। (अस्मद्)

(ङ) तस्या ——————— नाम शान्ती अस्ति। (मातृ)

(च) ———————— फलानि पतन्ति। (वृक्ष)

17. रेखांकित पदानि आधृत्य प्रश्ननिर्माणं कुरुत –

(क) शोकः धैर्यम् नाशयति।

(ख) महान भवितुं सत्संगतिः अपेक्षिता।

(ग) ऐश्वर्यस्य विभूषणं सुजनता अस्ति।

(घ) सर्वप्राणिषु वन्धुभूतः स्यात्।

(ङ) वेगान् न धारयेत्।

(च) स्वास्थ वृत्तः आयुषा न वियुज्यते।

(छ) लक्ष्मणः भरतस्य आगमनं रामाय सूचयति।

18. शब्दानाम् अर्थानाम् परस्परं मेलनं कुरुत –

(क)

| | | |
|---|---|---|
| (i) | गूढम् | आभारी |
| (ii) | पदम् | मेघानाम् |
| (iii) | भृङ्गैः | सुशोभितम् |
| (iv) | पयोदानम् | स्थानम् |
| (v) | लालितम् | भ्रमरैः |
| (vi) | कृतज्ञः | गुप्तम् |

(ख)

| | | |
|---|---|---|
| (i) | मोचयितुम् | प्रवीणः |
| (ii) | दक्षः | दयां कुरु |
| (iii) | त्वरितम् | मोचनाय |
| (iv) | दयस्व | शीघ्रम् |
| (v) | वियुज्यते | एवं मतिं कुर्वाणः |
| (vi) | मन्यमानः | वियुक्तः भवति |

19. अन्वयं लिखन्तु –

(क) क्षमीदाता गुणग्राही स्वामी पुण्येन लभते।
अनुकूलः शुचिर्दक्षः कविर्विद्वान सुदुर्लभः।।

(ख) धन्योऽस्ति राणा पुनरस्तिमन्त्री धन्यायोर्मेलनमस्ति धन्यम्।
धन्यः वयं स्मः समयश्च धन्यः धन्यं पुनर्दर्शन्मस्ति पुण्यम्।।

————————o————————